# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2021

## SANACOR04T-SANSKRIT (CC4)

Time Allotted: 2 Hours Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

(**Marks:** 20)

1. अधोलिखितेषु <u>एकः</u> प्रश्नः समाधेयः 10×1 = 10

(क) ज्ञानस्य स्वरूपं तथा ज्ञानार्जनस्य साधनानि श्रीमद्भगवद्गीतामाश्रित्य विचार्यताम्।

(ख) सत्वरजस्तमसां स्वरूपाणि कार्याणि च श्रीमद्भगवद्गीतायाः चतुर्दशाध्यायानुसारं लिख्यन्ताम्।

2. अधोविन्यस्तेषु <u>पञ्च</u> प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः 2×5 = 10

(क) इन्द्रियेषु मनसः परा का भवति ? कथं सा परा भवति ?

(ख) 'इन्द्रियाणि पराण्याहुः' — अत्र पराणि पदस्य कोऽर्थः ? कथमिन्द्रियाणि पराणि भवन्ति ?

(ग) मनः कथं षष्ठमिन्द्रियमिति गीतायाः द्वादशाध्यायानुसारं लेख्यम्।

(घ) अष्टधा प्रकृतिः का ?

(ङ) 'एतत् क्षेत्रं समासेन सविकारमुदाहृतम्' — अत्र क्षेत्रं नाम किम् ?

(च) असंयतात्मना योगो दुष्प्राप्यः कथं भवति ?

(छ) कः योगारूढः उच्यते ?

(ज) 'मनो दुर्निग्रहं चलम्' — कथं मनसः दुर्निग्रहत्वं चलत्वं च सिध्यति ?

### SECTION-B

(**Marks:** 25)

3. अधोलिखितेषु <u>एकः</u> प्रश्नः समाधेयः 10×1 = 10

(क) श्रीमद्भगवद्गीतानुसारं मनसः स्वरूपं पर्यालोच्यताम्।

(ख) श्रीमद्भगवद्गीतायाः भक्तियोगे भक्तविषये यदुक्तं तत् समासेन आलोच्यताम्।

4. अधोनिबद्धेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागर्या च व्याख्या कार्या 5×3 = 15

(क) क्लैव्यं मास्म गमः पार्थ नैतत् त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप॥

(ख) चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

(ग) व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥

(घ) काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥

(ङ) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः॥

## SECTION-C

**(Marks: 5)**

5. अधोलिखितेषु एकं विषयमाश्रित्य संस्कृतेन देवनागर्या च टीका लेख्याः 5×1 = 5

(क) वासुदेवः; (ख) अर्जुनः; (ग) अचला श्रद्धा।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——